श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४६

*विश्वरूपदर्शनवर्णनम्*

अयि देव पुरा किल त्वयि स्वयमुत्तानशये स्तनन्धये।
परिजृम्भणतो व्यपावृते वदने विश्वमचष्ट वल्लवी॥ १ ॥

पुनरप्यथ बालकैः समं त्वयि लीलानिरते जगत्पते।
फलसञ्चयवञ्चनक्रुधा तव मृद्भोजनमूचुरर्भकाः॥ २ ॥

अयि ते प्रळयावधौ विभो क्षितितोयादिसमस्तभक्षिणः।
मृदुपाशनतो रुजा भवेदिति भीता जननी चुकोप सा॥ ३ ॥

अयि दुर्विनयात्मक त्वया किमु मृत्सा बत वत्स भक्षिता।
इति मातृगिरं चिरं विभो वितथां त्वं प्रतिजज्ञिषे हसन्॥ ४ ॥

अयि ते सकलैर्विनिश्चिते विमतिश्चेद्वदनं विदार्यताम्।
इति मातृविभर्त्सितो मुखं विकसत्पद्मनिभं व्यदारयः॥ ५ ॥

अपि मृल्लवदर्शनोत्सुकां जननीं तां बहु तर्पयन्निव।
पृथिवीं निखिलां न केवलं भुवनान्यप्यखिलान्यदीदृशः॥ ६ ॥

कुहचिद्वनमम्बुधिः क्वचित् क्वचिदभ्रं कुहचिद्रसातलम्।
मनुजा दनुजाः क्वचित् सुरा ददृशे किं न तदा त्वदानने॥ ७ ॥

कलशाम्बुधिशायिनं पुनः परवैकुण्ठपदाधिवासिनम्।
स्वपुरश्च निजार्भकात्मकं कतिधा त्वां न ददर्श सा मुखे॥ ८ ॥

विकसद्भुवने मुखोदरे ननु भूयोऽपि तथाविधाननः।
अनया स्फुटमीक्षितो भवाननवस्थां जगतां बतातनोत्॥ ९ ॥

धृततत्त्वधियं तदा क्षणं जननीं तां प्रणयेन मोहयन्।
स्तनमम्ब दिशेत्युपासजन् भगवन्नद्भुतबाल पाहि माम्॥ १० ॥

**********